ॐ

ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । ॐ शान्तिः शान्तिः शान्तिः ॥

Om yaśchandasāmṛṣabho viśvarūpaḥ | chandobhyo'dhyamṛtāt sambabhūva | sa mendro medhayā spṛṇotu | amṛtasya deva dhāraṇo bhūyāsam | śarīraṁ me vicarṣaṇam | jihvā me madhumattamā | karṇā bhyāṁ bhūri viśruvam | brahmaṇaḥ kośo 'si medhayā pihitaḥ | śrutaṁ me gopāya | om śāntiḥ śāntiḥ śāntiḥ ||

ॐ अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणꣳ सवर्चसम् । सुमेधा अमृतोऽक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् । ॐ शान्तिः शान्तिः शान्तिः ॥

Om ahaṁ vṛkṣasya rerivā | kīrtiḥ pṛṣṭhaṁ gireriva | ūrdhvapavitro vājinīva svamṛtamasmi | draviṇaṁ̐ savarcasam | sumedhā amṛto'kṣitaḥ | iti triśaṅkorvedānuvacanam |
om śāntiḥ śāntiḥ śāntiḥ ||